# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर, २०१९

| कक्षा -शास्त्री-१ (SEM-१) | प्रश्नपत्रम् – ६<br>(C.C- 1.1.2 )<br>सन्दर्भग्रन्थः- न्यायासिद्धान्तमुक्तावली | गुणाः - ७० |
|---|---|---|
| विषयः - नव्यन्यायः | | |
| दिनाङ्कः - १५/१०/२०१९ | | समयः- ११:३० तः २:३० |

( विभागः-1 )

**प्र-1 द्वौ प्रश्नो समाधेयौ ।** 10

1. अनुमितिक्रमो लेख्यः ।
2. सदनुमानस्थले व्याप्तेः स्वरूपं लक्षयत ।
3. पक्षतायाः स्वरूपं प्रतिपादयत ।

**प्र-2 एकः समाधेयः ।** 10

1. "व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते" व्याख्यात ।
2. सिद्धान्तव्याप्तिलक्षणं दलसार्थक्यसहितं प्रतिपादयत ।

( विभागः-2)

**प्र-3 द्वौ समाधेयौ ।** 10

1. पदज्ञानं तु करणं....................सहकारिणी ।प्रपूर्य व्याख्यात ।
2. ग्रामीणस्य प्रथमतः........................फलम् । प्रपूर्य व्याख्यात ।

**प्र-4 एकः समाधेयः ।** 10

1. शक्तिग्रहकारणानि विवेचनीयानि ।
2. जातिशक्तिवादं परिचाययत ।

( विभागः-3)

**प्र-5 द्वौ समाधेयौ ।** 10

1. सोदाहरणं जहद्स्वार्थलक्षणायाः स्वरूपं प्रतिपादयत ।
2. "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" व्याख्यात ।
3. बहुव्रीहिसमासे लक्षणाविचारः क्रियताम् ।

**प्र-6 एकः समाधेयः ।** 10

1. पदानां चातुर्विध्यं प्रतिपादयत ।
2. सोदाहरणं सन्निधेः स्वरूपं प्रतिपादयत ।

**प्र-7 दश समाधेयाः ।** 10

1. उपमानस्य त्रैविध्यं लिखत ।
2. के पञ्चहेत्वाभासाः ?
3. का नाम शक्तिः ?
4. असाधारणव्यभिचारस्य लक्षणं लिखत ।
5. स्वरूपासिद्धस्य लक्षणं ब्रूत ।
6. विरुद्धस्य उदाहरणं लिखत ।
7. साध्यशून्यो.................... ।। पूरयत ।
8. शक्तिग्रहं.......................।। पूरयत ।
9. उपमितेः कः व्यापारः ?
10. का नाम लक्षितलक्षणा ?
11. किन्नाम विवरणम् ?
12. का नाम लक्षणा ।
13. राजपुरोहितौ सायुज्यकामौ यजेयाताम् – इत्यत्र कः समासः ?
14. छत्रिणो यान्ति- इत्यत्र छत्रिपदस्य कुत्र लक्षणा ?
15. आरूढवानरो वृक्ष –इत्यत्र वानरपदस्य कुत्र लक्षणा ?

********

## उत्तराणि

1. सादृश्यविशिष्टपिण्डदर्शनम्, असाधाकरणधर्मविशिष्टपिण्डदर्शनम्, वैधर्म्यविशिष्टपिण्डदर्शनम्।
2. सव्यभिचार- विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधः।
3. अस्मात्पदात् अयमर्थो बोद्धव्यः इतीश्वरेच्छा शक्तिः।
4. सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः।
5. पक्षे हेत्वभावः।
6. शब्दो नित्यः कृतकत्वात् शब्दत्ववत्।
7. साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः।
   उत्तपत्तिकालीनघटे गन्धादिर्यत्र साध्यते।।
8. शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्यात् व्यवहारतश्च।
   वाक्यस्यशेषात् विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्यवृद्धाः।
9. अतिदेशवाक्यार्थस्मरणम्।
10. शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणा।
11. तत्समानार्थकपदान्तरेण तदर्थकथनम्।
12. लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तिः।
13. द्वन्द्वसमासः।
14. एकसार्थवाहित्वे।
15. वानरारोहणकर्मणि।